श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकेशवसूरि कृतः

# ॥ लक्ष्मीदण्डकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ लक्ष्मीदण्डकः ॥

मन्दारमालाञ्चितकेशभारां
    मन्दाकिनीनिर्झरगौरहाराम्।
वृन्दारिकावन्दितकीर्तिपारां
    वन्दामहे मां कृतसद्विहाराम्॥

जय दुग्धाब्धितनये जय नारायणप्रिये।
जय हैरण्यवलये जय वेलापुराश्रये॥

जय जय जनयित्रि वेलापुराभ्यन्तरप्रस्फुरत्स्फारसौधाञ्चितोदारसालान्तरा-
गारखेलन्मुरारातिपार्श्वस्थिते। क्लृप्तविश्वस्थिते। चित्ररत्नज्वलद्रत्नसानू-
पमप्रत्नसौवर्णकोटीरकान्तिच्छटाचित्रिताच्छाम्बरे। देवि दिव्याम्बरे।
फुल्लसन्मल्लिकामालिकाप्रोल्लसन्नीलभोगीशभोगप्रतीकाशवेण्यर्धचन्द्रालिके।
वल्गुनीलालके। केशसौरभ्यलोभभ्रमत्स्थूलजम्बूफलाभालिमालासमाकर्षणे-
होत्पतन्मौलिवैडूर्यसन्दर्शनत्रस्तलीलाशुकालोकजातस्मिते।
देवजातस्तुते। ईश्वरीशेखरीभूतसोमस्मयोत्सादनाभ्युत्सुकत्वच्छिरःसंश्रित-
प्राप्तनित्योदयब्रध्नशङ्काकरस्वर्णकोटीरसन्दर्शनानन्दितस्वीयताताङ्क-
कारोहणाभीप्सुलब्धान्तिकार्कात्मजानिर्झराशङ्कनीयान्तकस्तूरिकाचित्रके।
वार्धिराट्पुत्रिके। मान्मथश्यामलेक्ष्वात्मधन्वाकृतिस्निग्धमुग्धाद्भुतभ्रूलताचाल-
नारब्धलोकालिनिर्माणरक्षिण्यसंहारलीलेऽमले। सर्वदे कोमले।
स्वप्रभान्यक्कृते स्वानुगश्रुत्यधःकारिणीकान्तिनीलोत्पले बाधितुं वागताभ्यां श्रवः-
सन्निधिं लोचनाभ्यां भृशं भूषिते। मञ्जुसम्भाषिते। किञ्चिदुद्बुद्धचाम्पेयपुष्प-
प्रतीकाशनासास्थितस्थूलमुक्ताफले। दत्तभक्तौघवाञ्छाफले।
शोणबिम्बप्रवालाधरद्योतविद्योतमानोल्लसद्दाडिमीबीजराजिप्रतीकाश-
दन्तावले। गत्यधःक्लृप्तदन्तावले। त्वत्पतिप्रेरितत्वष्टृसृष्टाद्भुतातीद्धभस्मा-
सुरत्रस्त दुर्गाशिवत्राणसन्तुष्टतद्दत्तशीतांशुरेखायुगात्मत्वसम्भावनायोग्य-
मुक्तामयप्रोल्लसत्कुण्डले। पालिताखण्डले॥ १ ॥

www.prapatti.com

अयि सुरुचिरनव्यदूर्वादलभ्रान्तिनिष्पादकप्रोल्लसत्कण्ठभूषानिबद्धायता-
नर्घ्यगारुत्मतांशुप्रजापात्यसारङ्गनारीस्थिरस्थापकाश्चर्यकृद्दिव्यमाधुर्य-
गीतोज्ज्वले। मञ्जुमुक्तावले। अङ्गदप्रोतदेवेन्द्रनीलोपलत्विड्घटाश्यामली-
भूतचोलोज्ज्वलस्थूलहेमार्गलाकारदोर्वल्लिके। फुल्लसन्मल्लिके।
ऊर्मिकासञ्चयस्यूतशोणोपलश्रीप्रवृद्धारुणच्छायमृद्वङ्गुलीपल्लवे।
लालितानन्दकृत्सल्लवे। दिव्यरेखाङ्कुशाम्भोजचक्रध्वजाद्यङ्कराजत्करे।
सम्पदेकाकरे। कङ्कणश्रेणिकाबद्धरत्नप्रभाजालचित्रीभवत्पद्मयुग्म-
स्फुरत्पञ्चशाखद्वये। गूढपुण्याशये। मत्पदाब्जोपकण्ठे चतुःपुरुषार्था
वसन्त्यत्र मामाश्रयं कुर्वते तान् प्रदास्यामि दासाय चेत्यर्थकं त्वन्मनोनिष्ठभावं
जगन्मङ्गलं सूचयद् वा वराभीतिमुद्राद्वया व्यञ्जयस्यङ्गपाणिद्वयेनाम्बिके।
पद्मपत्राम्बके। चारुगम्भीरकन्दर्पकेल्यर्थनाभीसरस्तीरसौवर्णसोपान-
रेखागतोत्तुङ्गवक्षोजनामाङ्कितस्वर्णशैलद्वयारोहणार्थेन्द्रनीलोपलाबद्ध-
सूक्ष्माध्वसम्भावनायोग्यसद्रोमराज्याढ्यदेहे रमे। का गतिः श्रीरमे।
निष्कनक्षत्रमालासदृक्षाभनक्षत्रमालाप्रवालस्रगेकावलीमुख्यभूषाविशेष-
प्रभाचित्रिताच्छोत्तरासङ्गसंछिन्नवक्षोरुहे। चञ्चलागौरि हे।
केलिकालक्वणत्किङ्किणीश्रेणिकायुक्तसौवर्णकाञ्चीनिबद्धस्फुरत्स्पष्ट-
नीव्याढ्यशुक्लाम्बरे। भासिताशाम्बरे। पुण्डरीकाक्षवक्षःस्थलीचर्चितानर्घ्यपाटीर-
पङ्काङ्कितानङ्गनिक्षेपकुम्भस्तने। प्रस्फुरद्गोस्तने॥ २॥

गुरुनिबिडनितम्बबिम्बाकृतिद्राविताशीतरुक्स्यन्दनप्रोतचन्द्रावलेपोत्करे।
स्वर्णविद्युत्करे। भोः प्रयच्छामि ते चित्ररत्नोर्मिकां मामिकां सादरादेह्यदो
मध्यमं भूषयाद्यैतया द्रष्टुमिच्छाम्यहं साध्विति त्वत्पतिप्रेरितायां मुदा पाणिना-
दाय धृत्वा रहः केशवं लीलयानन्दयः सप्तकीवास्ति ते। सप्तलोकीस्तुते।
चित्ररोचिर्महामेखलामण्डितानन्तरत्नस्फुरत्तोरणालङ्कृतश्लक्ष्णकन्दर्पका-
न्ताररम्भातरुद्वन्द्वसम्भावनीयोरुयुग्मे रमे। सम्पदं देहि मे सम्पदं देहि
मे सम्पदं देहि मे। पद्मरागोपलादर्शबिम्बप्रभाच्छायसुस्निग्धजानु द्वये
शोभने चन्द्रबिम्बानने। शम्बराराातिजैत्रप्रयाणोत्सवारम्भजृम्भन्महाकाहली-
डम्बरस्वर्णतूणीरजङ्घे शुभे। शारदार्कप्रभे। हंसराजक्वणद्धंसबिम्ब-
स्फुरद्धंसकालङ्कृतस्पष्टलेखाङ्कुशाम्भोजचक्रध्वजव्यञ्जनालङ्कृतश्रीपदे।
त्वां भजे सम्पदे। नम्रवृन्दारिकाशेखरीभूतसौवर्णकोटीररत्नावली-

दीपिकाराजिनीराजितोत्तुङ्गगाङ्गेयसिंहासनास्तीर्णसौवर्णबिन्दङ्कसौरभ्य-
सम्पन्नतल्पस्थिते। सन्ततस्वःस्थिते। चेटिकादत्तकर्पूरखण्डान्वितश्वेत-
वीटीदरादानलीलाचलद्दोर्लते। दैवतैरर्चिते। रत्नताटङ्ककेयूरहारा-
वलीमुख्यभूषाच्छटारञ्जितानेकदासीसभावेष्टिते। देवताभिष्टुते।
पार्श्वयुग्मोल्लसच्चामरग्राहिणीपञ्चशाखाम्बुजाधूतजृम्भद्रणत्कङ्कणाभिष्टुता-
भीशुसच्चामराभ्यां मुदा वीज्यसे। कर्मठैरिज्यसे। मञ्जुमञ्जीरकाञ्च्युर्मिका-
कङ्कणश्रेणिकेयूरहारावलीकुण्डलीमौलिनासामणिद्योतिते। भक्तसञ्जीविते॥ ३ ॥

जलधरगतशीतवातार्दिता चारुनीरन्ध्रदेवालयान्तर्गता विद्युदेषा हि किं
भूतलेऽपि स्वमाहात्म्यसन्दर्शनार्थं क्षमामास्थिता कल्पवल्ल्येव किं घस्रमात्रोल्ल-
सन्तं रविं रात्रिमात्रोल्लसन्तं विधुं संविधाय स्वतो वेधसातुष्टचित्तेन सृष्टा
सदाप्युल्लसन्ती महादिव्यतेजोमयी दिव्यपाञ्चालिका वेति सद्भिः सदा तर्क्यसे।
त्वां भजे मे भव श्रेयसे। पूर्वकद्वारनिष्ठेन नृत्यद्वराकाररम्भादिवाराङ्गना-
श्रेणिगीतामृताकर्णनायत्तचित्तामराराधितेनोच्चकैर्भार्गवीन्द्रेण सम्भाविते।
नो समा देवता देवि ते। दक्षिणद्वारनिष्ठेन सच्चित्रगुप्तादियुक्तेन
वैवस्वतेनार्च्यसे। योगिभिर्भाव्यसे। पश्चिमद्वारभाजा भृशं पाशिना स्वर्णदी-
मुख्यनद्यन्वितेनेड्यसे। सादरं पूज्यसे। उत्तरद्वारनिष्ठेन यक्षोत्तमैर्नम्र-
कोटीरजूटैर्मनोहारिभी राजराजेन भक्तेन सम्भाव्यसे। योगिभिः पूज्यसे।
लक्ष्मि पद्मालये भार्गवि श्रीरमे लोकमातः समुद्रेशकन्येऽच्युतप्रेयसि स्वर्ण-
शोभे च मे चेन्दिरे विष्णुवक्षःस्थिते पाहि पाहीति यः प्रातरुत्थाय भक्त्या
युतो नौति सोऽयं नरः सम्पदं प्राप्य विद्योतते। भूषणद्योतिते। दिव्यकारुण्य-
दृष्ट्याशु मां पश्य मे दिव्यकारुण्यदृष्ट्याशु मां पश्य मे दिव्यकारुण्यदृष्ट्याशु मां
पश्य मे। मां किमर्थं सदोपेक्षसे नेक्षसे त्वत्पदाब्जम् विना नास्ति मेऽन्या गतिः
सम्पदं देहि मे सम्पदं देहि मे सम्पदं देहि मे। त्वत्पदाब्जं प्रपन्नोऽस्म्यहं सर्वदा
त्वं प्रसन्ना सती पाहि मां पाहि मां पाहि मां पद्महस्ते त्रिलोकेश्वरि प्रार्थये
त्वामहं देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमः॥ ४ ॥

सत्रिषष्ट्युत्तरशतरगणाढ्यश्चतुर्दलः।
महालक्ष्मीदण्डकोऽयं कृतः केशवसूरिणा॥ ५ ॥

॥ इति लक्ष्मीदण्डकः सम्पूर्णः ॥